## अवपथासि च। (१२१/३५२४)

यजुषि [1]इत्येव। अनुदात्ते इति [2]चशब्देनानुकृष्यते। अवपथाःशब्देऽनुदात्ते अकारादौ [3]परतो यजुषि विषये एङ प्रकृत्या भवति। 'त्री रुद्रेभ्यो अवपथाः' (काठ. सं. ३०. ६. ३२)। [4]वपेर्लङि थासि 'तिङङतिङः' (८. १. २८/३९३५) इति निघातेनानुदात्तत्वम्। अनुदात्ते इत्येव, यद्रुद्रेभ्योऽवपथाः। निपातैर्यद्यदिह हन्त (८. १. ३०/३९३७) [5]इति निघातः प्रतिषिध्यते॥

## सर्वत्र विभाषा गोः। (१२२/८७)

सर्वत्र छन्दसि भाषायां च अति परतो गोः एङ प्रकृत्या भवति विभाषा। [6]गोऽग्रम्, गो अग्रम्। [7]छन्दसि– '[8]अपशवो वा अन्ये गोअश्वेभ्यः पशवो [9]गोअश्वान्' (तै. सं. ५. २. ९. ४)॥

## अवङ् स्फोटायनस्य। (१२३/८८)

अति इति निवृत्तम्। अचि इत्येतत् [10]त्वनुवर्तत एव। अचि परतः गोः[11] स्फोटायनस्याचार्यस्य मतेन अवङ आदेशो भवति। गवाग्रम्, गोऽग्रम्। [12]गवाजिनम्, गोऽजिनम्। गवौदनम्, [13]गवोदनम्। गवोष्ट्रम्, गवुष्ट्रम्। आद्युदात्तश्चाय[14]मादेशो निपात्यते, स निपातनस्वरो बहुव्रीहौ प्रकृतिस्वर[15]विधाने भवति। गावः अग्रमस्य गवाग्रः इति। अन्यत्र तु समासान्तोदात्तत्वेन बाध्यते। स्फोटायनग्रहणं पूजार्थं, विभाषा इत्येव हि वर्तते। व्यवस्थितविभाषा इयं, तेन गवाक्षः इत्यत्र नित्यमवङ भवति॥

## इन्द्रे च नित्यम्। (१२४/८९)

[16]इन्द्रशब्दस्थे अचि परतो गोर्नित्यमवङ आदेशो भवति। गवेन्द्रः[17]। [18]गवेन्द्रयज्ञस्वरः॥

## प्लुतप्रगृह्या अचि। (१२५/९०)

प्लुताश्च प्रगृह्याश्च अचि [19]प्रकृत्या भवन्ति। देवदत्त३ [20]अत्र न्वसि। यज्ञदत्त३इदमानय। आश्रयादत्र प्लुतः सिद्धः। प्रगृह्याः[21] – अग्नी इति। वायू इति। खट्वे इति। माले इति। अचि इत्यनुवर्तमाने पुनरज्ग्रहणमादेशनिमित्तस्य अचः [22]परिग्रहार्थम्। [23]तेनेह न भवति, जानु [24]उ अस्य रुजति जान्वस्य रुजति (म. भा. ३. ८८)। प्रगृह्यादुकारात् परस्य[25] अकारस्य सवर्णदीर्घत्वं प्रत्यनिमित्तत्वादत्र प्रकृतिभावो न भवति। नित्यग्रहणमिहानुवर्तते। प्लुतप्रगृह्याणां [25]नित्यमयमेव प्रकृतिभावो यथा स्याद्, 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (६. १. १२७/९१ ) इत्येतन् मा भूत् इति॥

---

1. इत्येव नास्ति क. ग. फ. 2. चकारेण फ. 3. परतः नास्ति फ. 4. वपेर्लङि–प्रतिषिध्यते नास्ति ग.
5. इत्यादिना क. 6. गोऽश्वम् गोअश्वम् फ. 7. छन्दसि नास्ति फ, छन्दसि विषये क. 8. वापशवो बध्यात् ये
गोऽश्वेभ्यः पशवो गोश्वाः क. 9. अश्वान् ह, अश्वाः इति मुद्रितः पाठः. 10. पुनरनुवर्तते फ. ह. 11. शब्दस्य
इत्यधिकम् फ. 12. गवाजिनम् नास्ति फ. 13. गवोदनम् नास्ति फ. 14 अयम् नास्ति फ. 15. बाधको क.
16. इन्द्रस्थे ब. 17. चरुः इत्यधिकम् ड. 18. गवेन्द्रो यज्ञः चरुश्च इति क. फ. यज्ञचरुः ब. 19. परतः
इत्यधिकम् क. फ. 20. अत्रासि फ. 21. चेत् इत्यधिकम् फ. 22. परिग्रहो यथा स्यात्, इह न भवति क.
23. तेन नास्ति क. 24. उ नास्ति फ. 25. अकारस्य नास्ति फ. 26. नित्यं यथा स्यात् क.